मात्स्यपुराणादिमते तु देवीभागवतं महापुराणम्। विष्णुभागवतमथाडुपपुराणमिति सिद्धम्। अत्र केचिद्देवीभागवतसम्मतित्वेन देवीयामलतन्त्रस्थम्।

"श्रीमद्भागवतं नाम पुराणं वेदसम्मितम्।
पारीक्षितायोपदिष्टं सत्यवत्यङ्गजन्मना॥
तत्र देव्यवताराश्च बहवः प्रतिपादिताः॥"

इति।

तथा

"इदं रहस्यचरितं राधोपासनमुत्तमम्।
व्यासाय मम भक्ताय प्रोक्तं पूर्व्वं मयाद्रिजे!॥
मत्तो रहस्यं ज्ञात्वैव राधामाहात्म्यमुत्तमम्।
एतस्य विस्तरं चक्रे श्रीमद्भागवते तथा॥
नारदे ब्रह्मवैवर्त्ते लोकानां हितकाम्यया॥"

इति।

सौभाग्यकल्पलतायां संहारभैरवतन्त्रस्थं वचनं लिखन्ति। तत्र परे विवदन्ते। तदुभयमपि गौरवभिया न लिख्यत इति॥ * ॥)

तत्र विष्णुभागवते प्रथमस्कन्धे परिक्षिन्नारदयोरुपाख्यानम्। विप्रशापात् परीक्षितस्य प्रायोपवेशः। शुकपरीक्षितसंवादश्च॥१॥*॥ द्वितीयस्कन्धे। योगधारणयोत्क्रान्तिः। नारदाजयोः संवादः। अवतारानुगीतम्। महदादिक्रमेण सृष्टिश्च॥ २॥ *॥ तृतीयस्कन्धे। विदुरोद्धवसंवादः। क्षत्तृमैत्रेययोः संवादः। पुराणसंहिताप्रश्नः। महापुरुषसंस्थितिः। प्राकृतिकः सर्गः। वैकृतिकाः सप्त सर्गाः। ब्रह्माण्डसम्भूतिः। विराट्पुरुषोत्पत्तिः। कालस्य स्थूलसूक्ष्मस्य गतिः। पाद्मसमुद्भवः। अम्भोधेर्भुव उद्धारणा। हिरण्याक्षवधः। ऊर्द्ध्वतिर्य्यगर्व्वाक् सर्गः। रुद्रसर्गः। अर्द्धनारीनरस्य सर्गः। ततः स्वायम्भुवमनुः स्त्रीणां आद्या प्रकृतिः शतरूपा च। कर्द्दमप्रजापतेर्धर्म्मपत्नीनां सन्तानः। भगवत्कपिलावतारः। कपिलेन देवहूतिसंवादश्च॥३॥*॥ चतुर्थस्कन्धे। नवब्रह्मसमुत्पत्तिः। दक्षयज्ञविनाशनम्। ध्रुवचरितम्। पृथोः प्राचीनबर्हिषश्च चरितम्। नारदस्य संवादश्च॥४॥*॥ पञ्चमस्कन्धे। प्रियव्रतचरितम्। द्वीपसमुद्रादिवर्षनद्युपवर्णनम्। ज्योतिश्चक्रस्य संस्थानम्। पातालनरकस्थितिश्च॥ ५॥*॥ षष्ठस्कन्धे। दक्षजन्म। तत्पुत्रीणां सन्ततिः। यतः देवासुरनरतिर्य्यङ्नगखगादयः। त्वाष्ट्रस्य जन्म च॥ ६॥*॥ सप्तमस्कन्धे। दितेः पुत्रयोर्निधनम्। प्रह्लादचरितञ्च॥ ७॥*॥ अष्टमस्कन्धे। मन्वन्तरानुचरितम्। गजेन्द्रविमोक्षणम्। मन्वन्तरावताराः। हयग्रीवादयोऽवताराः। जगत्पतेः कौर्म्ममात्स्यनारसिंहवामनरूपाणि। क्षीरोदमथनम्। देवासुरयुद्धञ्च॥ ८॥*॥ नवमस्कन्धे। राजवंशानुकीर्त्तनम्। इक्ष्वाकुजन्म तद्वंशः। सुद्युम्नवंशः। इलोपाख्यानम्। तारोपाख्यानम्। सूर्य्यवंशानुकथनम्। शशादनृगसौकन्यशर्य्यातिककुत्स्थखट्वाङ्गमान्धातृसौभरिरामाणां चरितम्। निमेरङ्गपरित्यागः। जनकानां सम्भवः। परशुरामजन्म। भुवो निःक्षत्त्रीकरणम्। ययातिनहुषभरतशान्तनुतत्सुतयदूनां वंशानुकीर्त्तनञ्च॥ ९॥*॥ दशमस्कन्धे। श्रीकृष्णस्य वसुदेवगृहे जन्म। गोकुले तस्य वृद्धिः। तस्य पूतनापयःपानम्। शकटोच्चाटनम्। तृणावर्त्तवधः। बकवत्सयोर्वधः। अघासुरवधः। धात्रा वत्सपालावगूहनम्। भ्रात्रा सह धेनुकस्य वधः। प्रलम्बवधः। गोपालानां दावाग्नेः परित्राणम्। कालीयदमनम्। महाहेर्नन्दमोक्षणम्। कन्यानां व्रतचर्य्या। यज्ञपत्नीभ्यः प्रसादः। विप्राणामनुतापनम्। गोवर्द्धनोद्धारणम्। शक्रसुरभिकर्तृककृष्णस्य यज्ञाभिषेकः। रात्रिषु स्त्रीभिः क्रीड़ा। शङ्खचूड़स्य वधः। केशिवधः। अक्रूरागमनम्। रामकृष्णयोर्मथुराप्रस्थानम्। व्रजस्त्रीणां विलापः। मथुरालोकनम्। गजमुष्टिकचाणूरकंसादीनां वधः। सान्दीपनेर्मृतपुत्रानयनम्। उद्धवरामाभ्यां सह हरिणा यदुचक्रस्य प्रियकरणम्। जरासन्धसमानीतबहुसैन्यवधः। यवनेन्द्रस्य घातनम्। कुशस्थल्या निवेशनम्। पारिजातहरणम्। रुक्मिण्योद्धरणम्। बाणेन सह युद्धम्। प्रागज्योतिषपतिं हत्वा कन्यानां हरणम्। चैद्यपौण्ड्रकशाल्वदन्तवक्रशम्बरद्विविदपीठमुरपञ्चजनानां माहात्म्यं वधश्च। वाराणस्या दाहः। पाण्डवान् निमित्तीकृत्य भूमेर्भारावतरणञ्च॥ १०॥*॥ एकादशस्कन्धे। विप्रशापापदेशेन यदुकुलसंहारः। उद्धवसंवादः। उद्धवाय आत्मविद्याकर्म्मविनिर्णयकथनम्। आत्मयोगानुभावतो मर्त्यपरित्यागश्च॥ ११॥*॥ द्वादशस्कन्धे। युगलक्षणवृत्तिः। कलौ नृणामुपप्लवः। चतुर्विधप्रलयः। त्रिविधोत्पत्तिः। परिक्षितदेहत्यागः। व्यासकर्तृकशाखाप्रणयनम्। मार्कण्डेयस्य सत्कथा। सूर्य्यस्य विभावश्च॥१२॥*॥

इति श्रीभागवते १२ स्कन्धे अनुक्रमणिकाध्यायः॥

भागवतः, त्रि, (भगवान् हरिः भगवती दुर्गा वास्य देवतेति। भगवत्+"सास्य देवता।"४।२।२४। इति अण्।) भगवद्भक्तः। तस्य लक्षणम्। यथा,

"सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः।
एवंतदीयसेवायां स भागवत उच्यते॥"

इति पाद्मोत्तरखण्डे ६६ अध्यायः॥*॥

स च यमदूतैस्त्याज्यः। यथा,—

"ये तु भागवता लोके तच्चित्तास्तत्परायणाः।
पूजयन्ति सदा विष्णुं ते च त्याज्याः सुदूरतः॥"

इति वह्निपुराणे दूतान् प्रति यमवचनम्॥

स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

"दशमीशेषसंयुक्तं दिनं वैष्णववल्लभम्।
ह्युपासते महीपाल! ते वै भागवता नराः॥
प्राणात्यये न चाश्नन्ति दिनं प्राप्य हरेर्नराः।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम्।
अर्च्चां तु साधयेद्यस्तु स वै भागवतो वरः॥
भक्तिर्न विच्युता येषां न च्युतानि व्रतानि च।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः॥
सदाचाररताः शिष्टाः सर्व्वभूतानुकम्पकाः।
शुचयस्त्यक्तरागा ये सदा भागवता हि ते॥"

एकादशस्कन्धे।

"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वपर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥"

हरियोगेश्वरोत्तरे।

"गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥"

बृहन्नारदीये।

"शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"

स्कान्दे।

"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं शास्त्रं जीविताद्धिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"

लैङ्गे।

"भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥"

गारुड़े।

"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः॥"

बृहन्नारदीये।

"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृद्धृता येश्च ते वै भागवतोत्तमाः॥
मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तद्वक्तरि सुभक्ताश्च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति च।
हृष्यते मत्कथायाञ्च स वै भागवतोत्तमः॥"

बृहन्नारदीये।

"मन्मानसाश्च मद्भक्ता मद्भक्तजनलोलुपाः।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥
अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"येऽर्च्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते॥"

लैङ्गे।

"विष्णुक्षेत्रे शुभान्येव करोति स्नेहसंयुतः।
प्रतिमाञ्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"